# ॥ श्रीललिता त्रिशत्यात्मक पञ्चदशी स्तुतिः ॥

श्रीमत्परमहंसेत्यादि समस्तबिरुदालङ्कृत श्रीजगद्गुरु सार्वभौम शृङ्गगिरि श्री श्री चन्द्रशेखरभारती महास्वामिभिः अनुगृहीता ।

ऐं ह्रीं श्रीं

कल्याणगुणसम्पूर्णां करुणमृतवर्षिणीम् ।
कलिकल्मशहन्त्रीं तां कलयेऽहमुमां हृदि ॥१ ॥

एणाङ्कशकलोत्तंसामेधमानप्रभां शिवाम् ।
एकचित्तविनिर्ध्यातामेकां स्तौम्युत्तमोत्तमाम् ॥२ ॥

ईश्वरत्वप्रदामीड्यामीशताण्डवसाक्षिणीम् ।
ईश्वरीं नौमि सर्वेषामीतिबाधाविनाशिनीम् ॥३ ॥

लब्धयौवनशोभाढ्यां लसद्दाडिमपाटलाम् ।
ललितां तां सदा वन्दे लम्बिमुक्तालताञ्चिताम् ॥४ ॥

ह्रींविभूषां ह्रींमतीं तां ह्रीङ्कारत्रयसम्पुटाम् ।
ह्रीङ्कारजपसुप्रीतां ह्रीं ह्रीमित्याश्रयाम्यहम् ॥५ ॥

हल्लीसलास्यसन्तुष्टां हरसौभाग्यदायिनीम् ।
हसदास्याम्बुजां गौरीं हंसिनीं भावयाम्यहम् ॥६ ॥

सर्वमङ्गलदात्रीं तां सर्वलोकवशङ्करीम् ।
सर्वापद्विनिहन्त्रीं च सर्वातीतां भजाम्यहम् ॥७ ॥

कलावतीं कलालापां कलात्मानं कलानिधिम् ।
कनत्कनकताटङ्कां करभोरुं भजाम्यहम् ॥८ ॥

हयमेधादिसंपूज्यां हस्तिकृत्तिप्रियाङ्गनाम् ।
हरिद्राकुङ्कुमादिग्धां हरिणाक्षीं भजाम्यहम् ॥९ ॥

लयवृद्धिविनिर्मुक्तां लब्धसम्पत्समुन्नतिम् ।
लब्धातिशयसर्वाङ्गीं लकुलेशीं भजाम्यहम् ॥१० ॥

ह्रीङ्कारवेद्यां ह्रींवाच्यां ह्रीङ्कारतरुशारिकाम् ।

ह्रीङ्कारपूज्यां ह्रींचिन्त्यां ह्रींरूपामाश्रयाम्यहम् ॥११ ॥

सर्ववेदान्तसंवेद्यां सर्वभूषणभूषिताम् ।
सर्वसम्पत्प्रदात्रीं तां सर्वेशीं भावयाम्यहम् ॥१२ ॥

कचनिर्जितकालाब्दां कपालिप्राणनायिकाम् ।
कामितार्थप्रदां देवीं कल्याणीमाश्रयाम्यहम् ॥१३ ॥

लक्ष्मीवाणीसेवितांघ्रिं लाकिन्यम्बास्वरूपिणीम् ।
लम्बोदरप्रजननीं लयकर्त्रीं भजाम्यहम् ॥१४ ॥

ह्रीङ्कारारण्यहरिणीं ह्रीङ्कारावालवल्लरीम् ।
ह्रीङ्कारसौख्यसन्धात्रीं ह्रींशिखामणिमाश्रये ॥१५ ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]